दिनाङ्कः - 07.12.2024 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

मुख्यवार्ताः

- राष्ट्रपतिः द्रौपदी मुर्मु अद्य उत्तर-ओडिशा-राज्ये विभिन्नानां परियोजनानां शिलान्यासं विहितवती।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् सर्वकारः अशेषे हि देशे सम्पर्कं वर्धयितुं प्रतिबद्धः अस्ति ।
- भारतं स्वनागरिकान् पश्चिम-एशियादेशस्य विद्यमानां स्थितिं दृष्ट्वा अग्रिमसूचनापर्यन्तं सिरिया-देशं प्रति यात्रां न कर्तुम् उपादिशत्।
- हॉकी-क्रीडायां कनिष्ठ-महिला-एशिया-चषकस्पर्धा आद्यारभ्य ओमानदेशस्य मस्कटेतिनगरे समारभते।
- श्वः दुबईनगरे पुरुषाणां अंडर 19 इति नवदश वर्षाभ्यन्तर -एशियाचषक-एकदिवसीय-क्रिकेट्-क्रीडायाः निर्णायक द्वन्द्वे भारतं बाङ्गलादेशं सम्मुखी करिष्यति ।

-------------------------------

राष्ट्रपतिः- ओडिशा

राष्ट्रपतिः द्रौपदी मुर्मु अद्य उत्तर-ओडिशा-राज्ये केन्दुझार्-मयूर्भञ्ज्-जनपदौ योजयन्तः चतुर्नवत्यधिकद्विशतोत्तर षट्सहस्त्र कोटि-रूप्यकाणां त्रयाणां रेल्-परियोजनानां सहितं विभिन्नानां परियोजनानां शिलान्यासं विहितवती। तया जनजातीय-अनुसन्धान-विकास-केन्द्रस्य, चतुर्दशमन्दिराणां पञ्चविंशतिः कोटिरूप्यकाणां शताधिक-शय्यायुक्तस्य चिकित्सालयस्य स्वगृहमण्डलस्य मयूर्भञ्ज्-नगरस्य रैरङ्गपुर्-नगरे दण्डबोस्-विमानपत्तनस्य उन्नतिकरणस्य विकास-परियोजनायाः अपि आरम्भः अकारि। बङ्ग्रीपोसी-तः गोरुमहिसानी-पर्यन्तं, बादामपहाड्-तः केन्दूझारगढपर्यन्तं, बुडमारा-तः चाकुलिया-पर्यन्तं च नूतनाः रेलमार्गाः सन्ति। नूतनाः रेल्-मार्गाः सम्पर्कं अविरतं वर्धयेयुः, आर्थिकवृद्धिं प्रोत्साहयेयुः, अस्मिन् प्रदेशे

जीवनस्तरं च वर्धयेयुः इति अपेक्षा अस्ति। प्रधानमन्त्री नरेन्द्र मोदी वर्यस्य अध्यक्षतायां आर्थिककार्य-मन्त्रिसभा-समित्या सद्यः एव रेल-परियोजनानां अनुमोदनं कृतम्। ओडिशा-राज्यस्य मुख्यमन्त्री मोहनचरणमाझी, केन्द्रीय-रेल-मन्त्री अश्विनी वैष्णव्, केन्द्रीय-जनजातीय-कार्य-मन्त्री जूयल् ओरम् इत्येते अस्मिन् शिलान्यास-समारोहे उपस्थिताः आसन्। मङ्गलवासरत: स्वगृहस्य ओडिशा-राज्यस्य पञ्चदिवसीया यात्रायां स्थिता राष्ट्रपतिः अद्य अपराह्णे देहलीनगरं प्रत्यागतवती।

-----------------------------

प्रधानमन्त्रिणा

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् सर्वकारः अशेषे हि देशे सम्पर्कं वर्धयितुं प्रतिबद्धः अस्ति । सामाजिक- अंतर्जालीय -पटले सः अवोचत् यत् दिल्ली-मेट्रो इत्यस्य चतुर्थ-चरणस्य अन्तर्गतस्य रिठाला-कुण्डली-मार्गस्य अनुमोदनेन दिल्ली-हरियाणा-नगरयोः यात्रा सुकरं भविष्यति इति। श्वः मन्त्रिमण्डलेन दिल्ली-मेट्रो-चतुर्थ-चरण-परियोजनायाः अन्तर्गतं मार्गस्य अनुमोदनं कृतम्। यत् आगामिषु चतुर्षु वर्षेषु पूर्णतां यास्यति। पूर्वं मन्त्रिमण्डलस्य निर्णयानाम् विषये प्रसारमाध्यमान् सम्बोधयन् केन्द्रीयमन्त्रिणा अश्विनी वैष्णवेण ह्यः प्रोक्तं यत् नगरीययात्रिकाणां कृते मेट्रो-यानस्य द्रुतः विस्तारः आवश्यकः अस्ति यतः एतत् यात्रायाः सुविधाजनकं साधनम् अस्ति इति।

सम्पूर्णे देशे पञ्चाशीति नूतनानि केन्द्रीय-विद्यालयानि (के. वी.) उद्घाटयितुं मन्त्रिमण्डलस्य निर्णयस्य प्रशंसां कुर्वन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् विद्यालयी-शिक्षां यथासंभवं सुलभं कर्तुं सर्वकारेण अयं महत्वपूर्ण: निर्णयो विहित:। सः प्रतिपादितवान् यत् यद्यपि अनेन कार्येण बहुसङ्ख्यकाः छात्राः उपकृताः भविष्यन्ति तथापि अनेन नैके वृत्त्यवसरा: अपि कल्प्यन्ते इति।

-----------------------------

एम. ई. ए. सिरियाः

भारतं स्वनागरिकान् पश्चिम-एशियादेशस्य विद्यमानां स्थितिं दृष्ट्वा, अग्रिमसूचनापर्यन्तं सिरिया-देशं प्रति यात्रां न कर्तुम् उपादिशत्। एकस्मिन् परामर्शे विदेशमन्त्रालयेन वर्तमानकाले सिरियादेशे स्थितेभ्यः भारतीयान् अद्यतनविवरणार्थं दमास्कस्-नगरस्य भारतीय-दूतावासेन सह सम्पर्कं स्थापयितुं सूचितम्। दूतावासस्य आपत्कालीन-सहायिका-सङ्ख्या

नव षट् त्रीणि नव नव त्रीणि त्रीणि अष्ट पञ्च नव सप्त त्रीणि

अस्ति तथा च ईमेल्-ऐ. डि. हाक् damascusi@mea.gov.in अस्ति। ये निर्गन्तुं शक्नुवन्ति तेभ्यः प्रारम्भिकेषु उपलभ्यमानेषु वाणिज्यविमानयानैः निर्गन्तुं सूचितम् अस्ति। अन्ये स्वसुरक्षायाः विषये अत्यन्तं सावधानम् आचरन्तु, स्वचालनं न्यूनातिन्यूनं परिमितं कुर्युः इति सर्वे प्रार्थिताः सन्ति।

------------------------------

राजनाथ- ध्वजदिवसः

रक्षामन्त्री राजनाथसिंहः अद्य सशस्त्रसैन्यध्वजदिवसस्य अवसरे भारतीयसशस्त्रसैन्यानां साहसं, शौर्यं, धैर्यं, त्यागं च नमस्कृतवान्। श्रीसिंहः स्वीय सन्देशे उक्तवान् यत् सशस्त्रसेनायाः ध्वजदिवसः भारतीयसशस्त्रसैनिकानां साहसं योगदानं च स्मर्तुं दिवसः अस्ति।

ऊनपञ्चाशदधिक नवदश-शततम वर्षात् राष्ट्रस्य वीरभटानां सम्माने सशस्त्रसैन्यध्वजदिवसः इति दिसम्बर् मासस्य सप्तमे दिनाङ्के आचर्यते ।

------------------------------

गुड्-गवर्नेन्स्-सप्ताहः

सुशासन सप्ताहस्य कालावधौ दिसेम्बर्-मासस्य नवदश दिनाङ्के प्रशासन्-गाव्-की-ओर, इति राष्ट्रव्यापी-अभियानस्य आरम्भः भविष्यति। कार्यक्रमः दिसेम्बर्-मासस्य चतुर्विंशतिः दिनाङ्कपर्यन्तं भविष्यति। यस्मिन् देशस्य सर्वेषु मण्डलेषु कार्यक्रमाः सम्मिलिताः भविष्यन्ति। अस्मिन् अभियाने सप्तशतोप्यधिकाः मण्डल-समाहर्ताः भागं ग्रहीष्यन्ति। अधिकारिणः उपमण्डलानां पञ्चायत्-समिति-मुख्यालयानां च भ्रमणं करिष्यन्ति। एतत् तृतीयं वारम् अस्ति यत् सर्वकारः स्वातमंडलस्तरे जनसमाह्वानानां निवारणार्थं सेवा-प्रदाने च परिष्काराय राष्ट्रियम् अभियानम् आयोजयिष्यति। प्रशासन् गाव् की ओर अभियान इत्यनेन सुशासनार्थं राष्ट्रिय-आन्दोलनस्य निर्माणं भविष्यति यत् भावी समाजं प्रेरयिष्यति।

------------------------------

<u>सीतारामन्-प्री-बड्जेट्</u>

वित्तमन्त्री निर्मला सीतारामन् अद्य नवदेहली-नगरे आगामि-केन्द्रीय-आयव्ययस्य (ID1) विषये विविध-कृषक-सङ्घैः प्रमुख-कृषि-अर्थशास्त्रज्ञैः च सह द्वितीय-आयव्ययपूर्व-परामर्शस्य आध्यक्षं आवहत् । सभायां वित्तराज्यमन्त्री पङ्कज् चौधरी वित्तसचिवः डी. ऐ. पी. ए. एम्. इत्यस्य सचिवः आर्थिककार्यविभागस्य सचिवः च उपस्थिताः आसन्।

------------------------------

<u>हॉकी</u>

_हॉकी-क्रीडायां कनिष्ठ-महिला-एशिया-चषकस्पर्धा आद्यारभ्य ओमानदेशस्य मस्कटेतिनगरे समारभते। अस्यां स्पर्धायां दशदलानि प्रातिभाग्यं कुर्वन्ति। स्पर्धेयम् अग्रिमवर्षे चिलीदेशे सम्भावितस्य एफ आई एच कनिष्ठ -विश्व-चषक-स्पर्धायै पात्रता विधायिकेति अस्ति। प्रथम-ए वर्गे भारतीयदलस्य साम्मुख्यं कोरिया, जापान, चीन-ताइपे, हांगकांग, श्रीलंकेति देशैः सह भविष्यति।

------------------------------

<u>अण्डर-१९ एशिया कप :</u>

श्वः दुबईनगरे पुरुषाणां अंडर 19 इति नवदश वर्षाभ्यन्तर-एशियाचषक-एकदिवसीय-क्रिकेट्-क्रीडायाः निर्णायक द्वन्द्वे भारतं बाङ्गलादेशं सम्मुखी करिष्यति । क्रीडायाः आरम्भः भारतीय समयानुसारं सार्द्धदश-वादने भविष्यति। अवधेयं वर्तते यत् बाङ्गलादेशः त्रयोविंशत्यधिक द्विसहस्रतमे वर्षे अण्डर-19 इति एशियाचषक क्रीडायाः निर्णायक द्वन्द्वे यूएई-दलं पराजय्य गतवर्षस्य विजेता अस्ति ।

।।इति वार्ता:।।